
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

M2433

M-2433

तर्क संग्रह

पोथे ३/

९८

कार्याभावाधिकरणवृत्त्यभावाप्रतियोगित्वं॥ अन्वयः कार्याधिकरणवृत्त्यभावप्रतियोगित्वं व्यतिरेकः

॥श्रीगणेशायनमः॥ ॥विश्वेश्वरं सांबमूर्तिं प्रणिपत्य गिरं गुरुं॥ टीकां शिशुहितां कुर्वे
॥तर्कसंग्रहदीपिकां॥१॥ चिकीर्षितस्य ग्रंथस्य अविघ्नपरिसमाप्त्यर्थं शिष्टाचारानुमित
॥श्रुतिबोधितकर्तव्यताकं इष्टदेवतानमस्कारलक्षणं मंगलं शिष्यशिक्षार्थं निबध्नन्
॥चिकीर्षितं प्रतिजानीते॥ निधायेति॥ ननु मंगलस्य समाप्तिसाधनत्वं नास्ति॥ मंगले
किरणावल्या दौ ॥कृतेपि समाप्त्यदर्शनात्॥ मंगलाभावेपि कादंबर्यादौ समाप्तिदर्शनात्॥ अन्वयव्य
॥तिरेकव्यभिचारादिति चेन्न॥ किरणावल्यादौ विघ्नबाहुल्यात् समाप्त्यभावः॥ कादंबर्या
॥दौ ग्रंथाद्बहिरेव मंगलं कृतं अतो न व्यभिचारः॥ ननु मंगलस्य कर्तव्यत्वे किं प्रमाणमि
॥ति चेन्न शिष्टाचारानुमितश्रुतेरेव प्रमाणत्वात्॥ तथाहि॥ मंगलं वेदबोधितकर्तव्या

रात्र्यादौ भोजनादौ व्यभिचारवारणा

कं अलौकिकाचिगीतादिशिष्टाचारविषयत्वात्॥ दशादिवत्॥ भोजनादौ व्यभिचारवारणाय ... दे ...

याविगीतेति॥ शिष्टपदं स्पष्टार्थं॥ न कुर्यान्निष्फलं कर्म जलताडनादेपि निषिद्धत्वात्॥

तर्क्यंते प्रतिपाद्यंत इति तर्काः द्रव्यादिसप्तपदार्थाः॥ तेषां संग्रहः संक्षेपेण स्व

रूपकथनं क्रियत इत्यर्थः॥ ननु बहुषु तर्कग्रंथेषु सत्सु किमर्थमपूर्वग्रंथः क्रि

यत इत्यत आह॥ बालानामिति॥ अतिविस्तरत्वात् बालानां तत्र बोधो न भवती

त्यर्थः॥ ग्रहणधारणपटुर्बालः॥ ननु स्तनंधयः॥ किं कृत्वा क्रियत इत्यत आह॥

निधायेति॥ विश्वेश्वरं जगन्नियंतारं सांबमूर्तिं हृदि मनसि निधाय नितरां स्थापयित्वा

सामान्यरूपेणावगतस्य पदार्थस्य विशेषरूपेण कथनं विभागः॥ पदार्थविभाजकविभागानुकूलव्यापारवान्॥

॥२॥ सर्वदा तद्ध्यानपरो भवेदित्यर्थः॥ गुरूणां वंदनं नमस्कारं विधाय स्वस्येष्टः पदार्थान् विभजते द्रव्येति।
पदस्यार्थः इति व्युत्पत्त्याभिधेयत्वं पदार्थसामान्यलक्षणं लभ्यते॥ ननु विभागादेव सप्तत्वे ल
ब्धे सप्तग्रहणं व्यर्थमिति चेन्न अधिकसंख्याव्यवच्छेदार्थत्वात्। न चातिरिक्तः पदार्थः प्रमितो
वा न वा नाद्यः प्रमितस्य निषेधायोगात्। न द्वितीयः प्रतियोगिप्रमितिं विना निषेधानुपपत्तेरि
ति चेन्न पदार्थत्वं द्रव्यादिसप्तान्यतमत्वव्याप्यमिति व्यवच्छेदार्थत्वात्। ननु सप्तान्यतमत्वं सप्तभिन्न
भिन्नत्वमिति वक्तव्यं एवं सप्तभिन्नस्याप्रसिद्धत्वात् सप्तान्यतमत्वं कथमिति चेन्न। द्रव्यादिसप्ता
न्यतमत्वं द्रव्यादिभेदसप्तकाभाववत्त्वं एवमग्रेपि द्रष्टव्यं। द्रव्यं विभजते तत्रेति तत्
त्र द्रव्यादिषु मध्ये नवैव द्रव्याणि नवैवेत्यन्वयः तानि कानीत्यत आह। पृथ्वीत्यादि ननु
तमसो दशमद्रव्यस्य विद्यमानत्वात् कथं नव द्रव्याणि तथा हि नीलं तमश्चलतीत्यबाधितप्र ॥२॥

~~[struck-through text]~~ : ॥ न जलतेजसी ॥ ... महत्वोद्भूत।वा।।ष्टतेजस्त्वावच्छिन्नप्रतियोगिताकाभावः ॥

तीति व्यवहारान्नीलरूपाधारतया क्रियाधारतया च द्रव्यत्वं तावत्सिद्धं ॥ तत्र तमसो नाकाशा
दिपंचके तर्भावः ॥ रूपवत्वात् ॥ अत एव न वायौ स्पर्शरहितत्वात् ॥ सदागतिमत्वाच्च नापि पृ
थिव्यां ॥ गंधाभावात् ॥ स्पर्शरहितत्वाच्च ॥ तस्मात्तमो दशमं द्रव्यमिति चेन्न ॥ तमसस्तेजोभाव
रूपत्वात् ॥ तथाहि ॥ तमो न रूपवद्द्रव्यं आलोकासहकृतचक्षुर्ग्राह्यत्वात् ॥ आलोकाभाववत् ॥
रूपिचाक्षुषप्रमायामालोकस्य कारणत्वात् ॥ तस्मात्प्रौढप्रकाशकतेजःसामान्याभावस्त
मः ॥ तत्र नीलं तमश्चलतीति प्रत्ययस्तु भ्रमः ॥ अतो नव द्रव्याणीति सिद्धं ॥ द्रव्यत्वजातिम
त्वं गुणवत्वं द्रव्यसामान्यस्य लक्षणं ॥ लक्ष्यैकदेशावर्तित्वमव्याप्तिः ॥ यथा गोः कपिलत्वं ॥ लक्ष्यवृत्ति
त्वे सति अलक्ष्यवर्तित्वं अतिव्याप्तिः ॥ यथा गोः शृंगित्वं ॥ लक्ष्यमात्रावर्तनं असंभवः ॥ यथा गोरे
न कशफत्वं ॥ एतद्दूषणत्रयरहितो धर्मः लक्षणं ॥ यथा गोः शृंगित्वे सति ॥ सास्नादिमत्वं ॥ सत्वअ

असाधारणधर्मरूपत्वे लक्ष्यतावच्छेदकसमनियतत्वमसाधारणत्वं। व्यावर्तकस्यैव लक्ष
णत्वे व्यावृत्ताव भिधेयत्वादौ च अतिव्याप्तिवारणाय तन्निष्ठत्वं धर्मविशेषणं देयं व्यवहार
स्यापि लक्षणप्रयोजनत्वेन देयं। व्यावृत्तेरपि व्यवहारसाधनत्वात् ननु गुणत्वं न द्रव्य
लक्षणे आद्यलक्षणं तत्र चेन्न द्रव्ये चाव्याप्तिरिति चेन्न। गुणसमानाधिकरणसत्ताभि
न्नजातिमत्त्वस्य विवक्षितत्वात्। ननु एवमपि एकं रूपं रसादितश्च गिति व्यवहारान् रूपादौ
अतिव्याप्तिरिति चेन्न एकार्थसमवायादेव तादृशव्यवहारोपपत्तौ गुणे गुणानङ्गीकारात्
गुणं विभजते रूपेति द्रव्यकर्मभिन्नत्वे सति सामान्यवान् गुणः। गुणत्वजातिमान् वा। ननु
लघुत्वमृदुत्वकठिनत्वादीनां विद्यमानत्वात् कथं चतुर्विंशतिगुणा इति चेन्न लघुत्वस्य
गुरुत्वाभावरूपत्वात् मृदुत्वकाठिन्यत्वयोः अवयवसंयोगविशेषरूपत्वात्। कर्म वि

लक्ष्यतावच्छेदकव्याप्यत्वे सति लक्ष्यतावच्छेदकव्यापकत्वं ॥

लक्ष्यतावच्छेदकाभाववदवृत्तित्वं ॥ व्याप्यत्वं ॥
लक्ष्यतावच्छेदकाधिकरणवृत्त्यभावाप्रति
योगित्वं व्यापकत्वं ॥ ६ ॥

भजते । उत्क्षेपणेति । संयोगभिन्नत्वे सति संयोगासमवायिकारणं कर्म । कर्मत्वजा
तिमद्वा भ्रमणादीनामपि गमनेंतर्भावात् न पंचत्वविरोधः । सामान्यं विभजते परमिति ।
परमधिकदेशवृत्ति ॥ अपरं न्यूनवृत्ति ॥ सामान्यादिचतुष्टये जातिर्नास्ति ॥ विशेषं विभजते ॥ नित्येति ॥
पृथिव्यादिचतुष्टयस्य परमाणवः ॥ आकाशादिपंचकं च । नित्यद्रव्याणि । समवायस्य भेदो नास्तीत्या
ह ॥ समवायस्त्विति । अभावं विभजते ॥ प्रागभाव इति ॥ तत्र उद्देशक्रमानुसारात् ॥ प्रथ
मं पृथिव्या लक्षणमाह ॥ गंधवतीति ॥ नाममात्रपदार्थसंकीर्तनं उद्देशः ॥ उद्देशक्रमे च स
र्वत्र पृथ्वैव नियामिका ॥ ननु सुरभ्यसुरभ्यवयवारब्धे द्रव्ये परस्परविरोधेन गंधानुत्पादाद
व्याप्तिः न च तत्र गंधप्रतीत्यनुपपत्तिरिति वाच्यं ॥ अवयवगंधस्यैव तत्र प्रतीतिसंभवेन चित्रगंधानं

गीकारात्॥ किंचोत्पन्नविनष्टघटादावव्याप्तिरिति चेन्न॥ गंधसमानाधिकरणद्रव्यत्वापरजाति
मत्त्वस्य विवक्षितत्वात्॥ ननु जलादावतिव्याप्तिरिति चेन्न॥ अन्वयव्यतिरेकाभ्यां पृथिवीगंध गंधप्रतीते
स्यैव तत्र भानांगीकारात्॥ ननु तथापि कालस्य सर्वाधारतया सर्वेषां लक्षणानां काले अतिव्याप्तिरि
तिचेन्न॥ सर्वाधारतयाप्रयोजकसंबंधभिन्नसंबंधेन लक्षणस्य अभिमतत्वात्॥ पृथिवीं
विभजते॥ सा द्विविधेति॥ नित्यत्वं ध्वंसाप्रतियोगित्वं॥ ध्वंसप्रतियोगित्वमनित्यत्वं॥ प्रकारांतरेण
विभजते॥ पुनरिति॥ आत्मनो भोगायतनं शरीरं॥ यदवच्छिन्नात्मनि भोगो जायते॥ तद्भोगायतनं
सुखदुःखान्यतरसाक्षात्कारो भोगः॥ शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनः
संयोगाश्रयत्वमिंद्रियत्वं शरीरेंद्रियभिन्नो विषयः॥ एवं गंधवच्छरीरं पार्थिवशरीरं॥ गंधवदिंद्रियं पा
र्थिवं॥ गंधवान् विषयः पार्थिवविषय इति लक्षणं बोध्यं॥ पार्थिवशरीरं दर्शयति॥ शरी
रमिति॥ इंद्रियं दर्शयति॥ इंद्रियमिति गंधग्राहकमिति प्रयोजनकथनं॥ घ्राणमिति संज्ञा ॥४॥

नासाग्रमित्याघ्राणमोक्तिः ॥ एवमुत्तरत्र ज्ञेयं ॥ पार्थिवविषयं दर्शयति ॥ मृत्पाषाणेति ॥ अपां लक्षणमाह ॥ शीतेति ॥ उत्तप्तपित
प्रजलेऽव्याप्तिवारणाय शीतस्पर्शसमानाधिकरणद्रव्यत्वापरजातिमत्वं वाच्यं ॥ शीतांशुशिलातलमस्ति सा दोषो जलसंबंधा
वच्छीतस्पर्शमानमिति नातिव्याप्तिः ॥ अन्यस्तु यं पूर्वीशिसव्यारव्येयं ॥ तेजसो लक्षणमाह ॥ उष्णस्पर्शवदिति ॥ उष्णं
जलमिति प्रतीतेः ॥ तेजःसंबंधानुविधायित्वान्नातिव्याप्तिः ॥ विषयं विभजते ॥ भौमेति ॥ ननु सुवर्णं पार्थिवं पीत
त्वात् ॥ गुरुत्वात् हरिद्रादिवदिति चेन्न असंतानलसंयोगे सति ॥ घृतादौ द्रवत्वनाशदर्शनेन जलमध्यस्थघृतेन
नाशदर्शनेन असति प्रतिबंधके पार्थिवद्रवत्वनाशाग्निसंयोगयोः कार्यकारणभावावधारणात् ॥ सुवर्णस्य असंता
नलसंयोगे सति ॥ अनुच्छिद्यमानद्रवत्वाधिकरणत्वेन पार्थिवत्वानुपपत्तेः ॥ तस्मात्पीतद्रव्यद्रवत्वनाशप्रति
बंधकतया द्रव्यांतरसिद्धौ नैमित्तिकद्रवत्वाधिकरणतया जलत्वानुपपत्तेः ॥ रूपवत्तया वाय्वादिष्वनंत
र्भावात्तैजसत्वसिद्धिः ॥ तस्य उष्णस्पर्शभास्वररूपयोः रूपष्टंभकपार्थिवरूपस्पर्शाभ्यां प्रतिबंधादनुपल
ब्धिः ॥ तस्मात्सुवर्णं तैजसमिति ॥ वायुं लक्षयति ॥ रूपरहितत्वे सति ॥ स्पर्शसमानाधिकरणद्रव्यत्वापर

जातिमत्त्वं लक्षणार्थः॥ एतेन आद्यद्वयस्य विनष्टवायौ चनाव्याप्तिः॥ रूपरहितत्वमिति॥ आकाशादावतिव्याप्ति
वारणाय स्पर्शवानिति॥ पृथिव्यादावतिव्याप्तिवारणाय रूपरहित इति॥ ननु प्राणस्य कुत्रांतर्भाव इत्यत आह
शरीरेति॥ स एवेति॥ एक एव प्राणः स्थानभेदात् प्राणापानादिशब्दैर्व्यवह्रियत इत्यर्थः॥ स्पर्शानुमेयो वायुः॥
तथाहि॥ योयं वायौ वाति सति॥ अनुष्णाशीतस्पर्शो भासते स स्पर्शः क्वचिदाश्रितः॥ गुणत्वात् रूप
वत्॥ न चास्य पृथिव्याश्रयः॥ उद्भूतस्पर्शवत्पार्थिवस्य उद्भूतरूपवत्त्वनियमात्॥ न जलतेजसी॥
अनुष्णाशीतस्पर्शवत्त्वात्॥ न विभुचतुष्टयं तदाश्रयः॥ सर्वत्रोपलब्धिप्रसंगात्॥ न मनः परमाणु
स्पर्शस्यातींद्रियत्वात्॥ तस्माद्यः प्रतीयमानस्पर्शाश्रयः स वायुः॥ ननु वायुः प्रत्यक्षः प्रत्यक्षस्पर्शा
श्रयत्वात्॥ घटवदिति चेन्न॥ उद्भूतरूपवत्त्वस्योपाधित्वात्॥ यत्र द्रव्यत्वे सति बहिरिंद्रियप्रत्यक्ष
त्वं तत्र उद्भूतरूपवत्त्वमिति साध्यव्यापकत्वं॥ पक्षे साधनाव्यापकत्वं॥ न चैवं तप्तवारिस्थतेज
सोऽप्यप्रत्यक्षत्वापत्तिः॥ इष्टत्वात्॥ तस्मात् रूपरहितत्वाद्वायुरप्रत्यक्षः॥ इदानीं कार्यरूपपृथि

व्यादिचतुष्टयस्य उत्पत्तिविनाशक्रमः॥ कथ्यते॥ ईश्वरस्य चिकीर्षावशात् परमाणुषु क्रिया जा
यते॥ ततः परमाणुद्वयसंयोगे सति॥ द्व्यणुकमुत्पद्यते॥ त्रिभिर्द्व्यणुकैस्त्र्यणुकमुत्पद्यते॥ एवं चतुरणुका
दिक्रमेण महापृथिवी॥ महत्य आपः महत्तेजः महान्वायुरुत्पद्यते॥ एवमुत्पन्नस्य कार्यद्रव्यस्य ईश्व
रस्य संजिहीर्षावशात्॥ क्रिययापरमाणुद्वयविभागे सति॥ द्व्यणुकनाशः॥ ततस्त्र्यणुकस्य ततश्च
तुरणुकस्य इत्येवं पृथिव्यादिनाशः॥ असमवायिकारणनाशात् द्व्यणुकनाशः॥ समवायिकारणना
शात् त्र्यणुकनाश इति संप्रदायः॥ सर्वत्रासमवायिकारणनाशात्॥ द्रव्यनाश इति नवीनाः॥ सर्व
त्रेति॥ संप्रदायमते गौरवमेवेति भावः॥ किं पुनः परमाणुसद्भावे प्रमाणं॥ उच्यते॥ जालसूर्यमरीचि
स्थं सूक्ष्मतमं यदुपलभ्यते॥ तत्सावयवं चाक्षुषद्रव्यत्वात् पटवत्॥ त्र्यणुकावयवोपि सावयवः महदा
रंभकत्वात्॥ तंतुवत्॥ यो द्व्यणुकावयवः॥ स एव परमाणुः स च नित्यः कार्यत्वे अनवस्थाप्रसंगात्॥

तथाच मेरुसर्षपयोरपि तुल्यपरिमाणापत्तिः॥ सर्वप्रलयसद्भावे ध्वाततायथा प्रथमकल्पस्यादौ॥ इत्सा
दिश्रुतिः प्रमाणं॥ सर्वकार्यद्रव्यध्वंसः अवांतरप्रलयः॥ सर्वभावकार्यध्वंसो महाप्रलय इति विवेकात्॥
आकाशं लक्षयति॥ शब्दगुणमिति॥ ननु आकाशमपि किं पृथिव्यादिवत् नानानेत्याह॥ तच्चैकमिति॥
भेदे प्रमाणाभावादित्यर्थः॥ एकत्वादेव सर्वत्र शब्दोपलब्धेः॥ विभुत्वमंगीकर्तव्यमित्याह॥ विभ्विति॥
सर्वमूर्तद्रव्यसंयोगित्वं विभुत्वं॥ परिच्छिन्नपरिमाणत्वं क्रियावत्त्वं वा॥ विभुत्वादेव व्याप्तवत्नि सर्वमि
त्याह॥ नित्यं चेति॥ कालं लक्षयति॥ अतीतेति॥ सर्वाधारः कालः सर्वकार्यनिमित्तकारणं च॥ दि
शो लक्षणमाह॥ प्राचीति॥ दिगपि कार्यमात्रे निमित्तकारणं॥ आत्मनो लक्षणमाह॥ ज्ञानेति॥ आत्मा
नं विभजते॥ स द्विविधेति॥ परमात्मनो लक्षणमाह॥ तत्रेति॥ नित्यज्ञानाधिकरणत्वं ईश्वरत्वं॥
ननु ईश्वरस्य सद्भावे किं प्रमाणं न तावत्प्रत्यक्षं॥ तद्धि बाह्यं॥ आंतरं वा॥ नाद्यः॥ अरूपिद्रव्यत्वात्

नां सः। अन्न सुखादिव्यतिरिक्तत्वात्॥ नाप्यनुमानं॥ लिंगाभावादिति चेन्न अंकुरादिकं कर्तृजन्यं॥ कार्यत्वात्
घटवदित्यनुमानस्य प्रमाणत्वात्॥ उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वं कर्तृत्वं॥ उपादानं
समवायिकारणं॥ सकलपरमाण्वादिसूक्ष्मदर्शित्वात् सर्वज्ञत्वं॥ यः सर्वज्ञः स सर्ववित् इत्यागमोपि
तत्र प्रमाणं॥ जीवस्य लक्षणमाह॥ जीव इति॥ सुखादिमत्त्वं जीवलक्षणं॥ ननु मनुष्योहं ब्राह्मणो
हं इत्यादौ सर्वत्र अहंप्रत्यये शरीरस्यैव विषयत्वात्॥ शरीरमेवात्मेति चेन्न शरीरस्य करचरणादिना
शे शरीरनाशात्॥ आत्मनोपि नाशप्रसंगात्॥ नापींद्रियाणामात्मत्वं॥ योहं घटमद्राक्षं सोहमिदानीं स्पृशामि
इत्यनुसंधानाभावप्रसंगात्॥ अन्यानुभूते अन्यस्य अनुसंधानायोगात्॥ तस्माद्देहेंद्रियव्यतिरि
क्तो जीवः॥ सुखदुःखादिवैचित्र्यात्॥ प्रतिशरीरं भिन्नः॥ स च न परमाणुः॥ शरीरव्यापिसुखानु
पलब्धिप्रसंगात्॥ न मध्यमपरिमाणं॥ तथा सति सावयवत्वप्रसंगेन कदाचनाशात् कृतनाशाकृताभ्यागम

प्रसंगात्॥ तस्मान्निरस्तो विभुर्भाव:॥ मनसो लक्षणमाह॥ सुखेति॥ स्पर्शरहितत्वे सति क्रियावत्त्वं
मनसो लक्षणं॥ मनो विभजते॥ तच्चेति॥ एकैकस्यात्मन एकैकं मन इत्यात्मनो अनेकत्वात्॥ मनसो
प्यनेकत्वमित्यर्थ:॥ परमाणुरूपमिति॥ मध्यमपरिमाणत्वे अनित्यत्वप्रसंगादित्यर्थ:॥ ननु मनो विभु स्पर्शर
हितद्रव्यद्रव्यत्वात् आकाशवदिति चेन्न मनसो विभुत्वे आत्ममन:संयोगस्य समवायिकारणस्याभावात् ज्ञाना
नुत्पत्तिप्रसंगात्॥ नच विभुद्वयस्य संयोगो नास्तीति वाच्यं॥ तत्संयोगस्य नित्यत्वेन सुषुप्त्यभाव
प्रसंगात्॥ पुरीतद्व्यतिरिक्तप्रदेशस्यात्ममन:संयोगस्य सर्वदा विद्यमानत्वाच्च॥ अणुत्वे तु यदा मन: पुरी
ततीं प्रविशति॥ तदा सुषुप्ति:॥ यदा नि:सरति तदा ज्ञानोत्पत्तिरिति अणुत्वसिद्धि:॥ रूपं लक्षयति॥ चक्षु
रिति॥ संख्यादावतिव्याप्तिवारणाय मात्रपदं॥ रूपत्वेतिव्याप्तिवारणाय गुणपदं॥ रूपं विभजते तच्चेति॥
ननु अवयव्यवयवेषु नीलपीतादिसमुदाय एव न चित्ररूपमिति चेन्न॥ रूपरहितत्वेन पटस्य अप्रत्यक्षत्वप्रसंगात्॥
नच रूपसमवेतत्वं प्रत्यक्षप्रयोजकं॥ गौरवात्॥ तस्मात् पटस्य प्रत्यक्षत्वानुपपत्त्या चित्ररूपसिद्धि:॥
स्यात्संताभावसमानाधिकरणत्वे अव्याप्यवृत्तित्वं॥ रूपस्याव्याप्यवृत्तित्वनियमात्॥ ननु चित्रपटे अवयवरूपस्य
प्रतीतिरिति चेन्न

रसंलक्षयति॥रसनेति॥रसत्वेति व्याप्तिवारणायगुणपदं॥रसंविभजते॥सचेति॥रसस्याश्रयमाह॥
॥पृथिवीति॥आश्रयंविभज्यदर्शयति॥पृथिव्यामिति॥गंधंलक्षयति॥घ्राणेति॥गंधत्वेति व्याप्तिवारणाय
गुणपदं॥स्पर्शंलक्षयति॥त्वगिति॥स्पर्शत्वेति व्याप्तिवारणायगुणपदं॥संयोगादावतिव्याप्तिवारणायगुणपदं॥
पाकजमिति॥पाकस्तेजःसंयोगःतेनपूर्वरूपंनश्यति॥रूपांतरमुत्पद्यत इत्यर्थः॥अत्रपरमाणुष्वेव
पाकोनद्व्यणुकादौ॥आपाकनिक्षिप्तेघटेपरमाणुषुरूपांतरोत्पत्तौश्यामघटनाशेपुनर्द्व्यणुका
परमाणुरूपे दिक्रमेणरक्तघटोत्पत्तिः॥तत्रपरमाणवःसमवायिकारणं॥परमाणुतेजःसंयोगःअसमवायिकारणं॥
अदृष्टादिकंनिमित्तकारणं॥द्व्यणुकादिरूपेकारणरूपंअसमवायिकारणमितिपीलुपाकवादिनः॥
पूर्वघटस्यनाशंविनैवावयविन्यवयवेषुपरमाणुपर्यंतेषुयुगपद्रूपांतरोत्पत्तिरितिपिठरपाक
घटेपाकस्वीकारादेव॥ वादिनोनैयायिकाः॥अतएवपार्थिवपरमाणुषुरूपादिकमनित्यमित्यर्थः॥अन्यत्रजलादावित्यर्थः॥

॥८॥

नित्यगतमिति॥ परमाणुगतमित्यर्थः॥ अनित्यगतमिति॥ द्व्यणुकादिनिष्ठमित्यर्थः॥ रूपादिष्वनुवृत्त
मुद्भूतत्वं प्रत्यक्षं॥ अनुद्भूतमप्रत्यक्षं॥ उद्भूतत्वं प्रत्यक्षप्रयोजको धर्मः॥ तदभावः अनुद्भूतत्वं॥ सं
ख्यां लक्षयति॥ एकेति॥ परिमाणं लक्षयति॥ मानमिति॥ परिमाणं विभजते॥ तच्चेति भावप्रधानो
निर्देशः॥ अणुत्वं॥ महत्त्वं दीर्घत्वं ह्रस्वत्वं चेत्यर्थः॥ पृथक्त्वं लक्षयति॥ पृथगिति॥ इदमस्मात्पृथगि
ति व्यवहारकारणमित्यर्थः॥ संयोगं लक्षयति॥ संयुक्तेति॥ इमौ संयुक्ताविति व्यवहारहेतुरित्यर्थः॥
संख्यादिलक्षणेषु सर्वत्र दिक्कालादौ अतिव्याप्तिवारणाय असाधारणेति॥ संयोगो द्विविधः॥ कर्मजः संयोग पदंदेयं
जश्च॥ आद्यो हस्तक्रियया पुस्तकसंयोगः॥ द्वितीयो हस्तपुस्तकसंयोगात् कायपुस्तकसंयोगः॥ अव्या
प्यवृत्तिः संयोगः स्वात्यन्ताभावसमानाधिकरणत्वमव्याप्यवृत्तित्वं॥ विभागं लक्षयति॥ संयोगेति॥ काला
दावतिव्याप्तिवारणाय गुण इति॥ रूपादावतिव्याप्तिवारणाय संयोगनाशक इति॥ विभागोपि द्विविधः कर्म
जो विभागजश्च॥ आद्यो हस्तपुस्तकविभागः॥ द्वितीयः कायपुस्तकविभागः॥ परत्वापरत्वयोर्लक्षणमाह॥

८॥

परापरेति॥ परव्यवहारकारणं परत्वं॥ अपरव्यवहारकारणमपरत्वमित्यर्थः॥ विभजेत॥ ते द्विविधे इति॥ दि
क्कृतमेतदुदाहरणमाह॥ दूरस्थ इति॥ कालकृते उदाहरति॥ ज्येष्ठेति॥ गुरुत्वं लक्षयति॥ आद्येति॥ द्वितीयादि
पतनस्य वेगासमवायिकारणत्वात्॥ वेगे अतिव्याप्तिवारणाय॥ आद्येति द्रवत्वं लक्षयति॥ स्यंदनेति॥ स्यंदनं
स्रवणं तेजःसंयोगजन्यं नैमित्तिकं॥ तद्भिन्नं सांसिद्धिकं॥ पृथिव्यां नैमित्तिकमुदाहरति॥ घृतादाविति॥
तेजसि तदाह॥ सुवर्णादाविति स्नेहं लक्षयति॥ चूर्णेति॥ कालादावतिव्याप्तिवारणाय गुणस्येति॥ रूपा
दावतिव्याप्तिवारणाय पिंडीभावेति॥ शब्दं लक्षयति॥ श्रोत्रेति॥ शब्दत्वेतिव्याप्तिवारणाय गुण इति॥ रू
पादावतिव्याप्तिवारणाय श्रोत्रेति॥ ध्वन्यात्मकशब्दस्त्रिविधः संयोगजो विभागजः शब्दजश्चेति तत्रा
द्यः॥ भेरीदंडसंयोगजन्यः॥ द्वितीयो वंशे पाट्यमाने दलद्वयविभागजन्यश्चटचटाशब्दः॥ भेर्या
दिदेशमारभ्य श्रोत्रपर्यंतं॥ द्वितीयादिशब्दाः शब्दजाः॥ बुद्धेर्लक्षणमाह॥ ज्ञानमिति सत्यनुव्यवसाय
॥ सर्वेति॥ आकाशादावतिव्याप्तिवारणाय गुण इति॥ रूपादावति
व्याप्तिवारणाय सर्वव्यवहारेति॥

गम्यज्ञानत्वमेवलक्षणमित्यर्थः॥ बुद्धिं विभजते॥ सेति॥ स्मृतेर्लक्षणमाह॥ संस्कारेति॥ भावनाख्यः
संस्कारः॥ सोयंदेवदत्त इति प्रत्यभिज्ञाप्रत्यक्षे अतिव्याप्तिवारणाय मात्रेति॥ संस्कारध्वंसेतिव्याप्ति
वारणाय॥ ज्ञानमिति घटादिप्रत्यक्षे अतिव्याप्तिवारणाय संस्कारजन्यत्वमिति॥ अनुभवं लक्षयति॥
तद्भिन्नमिति॥ स्मृतिभिन्नज्ञानं अनुभव इत्यर्थः॥ अनुभवं विभजते॥ स द्विविध इति॥ यथार्थानुभ
वस्य लक्षणमाह॥ तद्वतीति॥ ननु घटे घटत्वमिति प्रमायामव्याप्तिः॥ घटत्वे घटाभावादिति चेन्न
यत्र यत्संबंधोस्ति॥ तत्र तत्संबंधानुभव इत्यर्थः॥ घटत्वेपि घटसंबंधोस्तीति नाव्याप्तिः॥ सैवेति॥ य
थार्थानुभव एव शास्त्रे प्रमेत्युच्यत इत्यर्थः॥ अयथार्थं लक्षयति॥ तदभाववतीति॥ ननु इदं संयोगी
ति प्रमायां अतिव्याप्तिरिति चेन्न यदवच्छेदेन यत्संबंधाभावस्तदवच्छेदेन तत्संबंधज्ञानस्य विवक्षि
तत्वात् संयोगाभावावच्छेदेन संयोगज्ञानस्याभावात्॥ संयोगावच्छेदेन संयोगसंबंधस्य सत्वात्॥ नातिव्याप्तिः
॥ अयथार्थानुभवं विभजते॥ यथार्थेति॥ प्रसंगात्प्रमाकरणं विभजते॥ तत्करणमिति प्रमाकरणमित्यर्थः॥ प्रमा

कारणं प्रमाणमिति प्रमाणसामान्यस्य लक्षणं ॥ करणलक्षणमाह ॥ असाधारणेति ॥ साधारणकारणे दिक्कालादावतिव्याप्तिवारणाय असाधारणेति ॥ कारणलक्षणमाह ॥ कार्येति ॥ पूर्ववृत्ति कारणमित्युक्ते रासभादावतिव्याप्तिः स्यादतो नियतेति ॥ तावन्मात्रे कृते कार्येऽतिव्याप्तिः ॥ अतः पूर्ववृत्तीति ॥ ननु तंतुरूपमपि पटं प्रति कारणं स्यादिति चेन्न अनन्यथासिद्धत्वे सतीति विशेषणात् ॥ अनन्यथासिद्धत्वं अन्यथासिद्धिविरहः ॥ अन्यथासिद्धिश्च त्रिविधा येन सहैव यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते ॥ तत्तेन अन्यथासिद्धं ॥ यथा तंतुना तंतुरूपं तंतुत्वं च पटं प्रति ॥ अन्यं प्रति पूर्ववृत्तित्वे ज्ञात एव पटं प्रति आकाशस्य अन्यत्र क्लृप्तपूर्ववृत्तिन एव कार्यसंभवे तत्सहभूतं अन्यथासिद्धं यथा पाकजस्थले गंधं प्रति प्रागभावस्य ॥ एवं च अनन्यथासिद्धनियतपूर्ववृत्तित्वं कारणत्वं कार्यलक्षणमाह ॥ कार्यमिति ॥ कारणं विभजते ॥ कारणमिति ॥ समवायिकारणलक्षणमाह ॥ यत्समवेतमिति

॥२०॥ यस्मिन्समवेतमित्यर्थः॥ असमवायिकारणं लक्षयति॥ कार्येणेति॥ कार्येणेत्येतदुदाहरति॥ यथा
तन्तुसंयोग इति॥ कार्येण पटेन एकस्मिन्तन्तौ समवेतत्वात्॥ तन्तुसंयोगः पटस्यासमवायिका
रणमित्यर्थः॥ कारणेन सहेत्येतदुदाहरति॥ तन्तुरूपमिति॥ कारणेन पटेन सह एकस्मिन्तन्तौ सम
वेतत्वात् तन्तुरूपं पटरूपस्य असमवायिकारणमित्यर्थः॥ कारणं लक्षयति॥ तदुभयेति॥ समवाय्यस निमित्त
मवायिभिन्नं निमित्तकारणमित्यर्थः॥ कारणलक्षणमुपसंहरति॥ तदेतदिति॥ प्रत्यक्षलक्षणमाह॥ तत्रेति॥ प्रमाणच
तुष्टयमध्ये इत्यर्थः॥ प्रत्यक्षज्ञानस्य लक्षणमाह॥ इन्द्रियेति॥ इन्द्रियं चक्षुरादिकं॥ अर्थो घटादिः॥ तयोः सन्निक
र्षः॥ संयोगादिस्तज्जन्यं॥ ज्ञानमित्यर्थः॥ निर्विकल्पकस्य लक्षणमाह॥ निष्प्रकारमिति॥ विशेषणविशेष्यसंबन्धा
नवगाहि ज्ञानमित्यर्थः॥ निर्विकल्पकस्य लक्षणमाह॥ निष्प्रकारमिति॥ ननु निर्विकल्पके किं प्रमाणमिति
चेन्न गौरिति विशिष्टज्ञानं विशेषणज्ञानजन्यं विशिष्टज्ञानत्वात्॥ दण्डीति ज्ञानवदित्यनुमानस्य प्रमाणत्वात्॥
विशेषणज्ञानस्यापि सविकल्पकत्वे अनवस्थाप्रसंगात्॥ निर्विकल्पकसिद्धिः॥ सविकल्पकं लक्षयति॥ ॥२०॥

भूयोदर्शनेनेति ननु। पार्थिवत्वलोहलेख्यत्वयोः [illegible] दोषानाशः सहचारदर्शनेऽपि
वज्रमणौ व्यभिचारोपलब्धेः

पक्षता॥ साध्यसिद्धिरनुमितिं प्रति प्रतिबंधिका॥ सिषाधयिषासत्त्वेऽप्यनुमित्युपमितिरच्छायां अनु
मिति दर्शनात्॥ सिषाधयिषोत्तेजिका॥ तथा चोत्तेजकाभावविशिष्टमण्यभावस्य दाहकारणत्ववत्॥
सिषाधयिषाविरहसहकृतसिद्ध्यभावस्यापि अनुमितिकारणत्वं॥ परामर्शं लक्षयति॥ व्याप्तीति॥
व्याप्तिविषयकं यत् पक्षधर्मताज्ञानं स परामर्श इत्यर्थः॥ परामर्शमभिनीय दर्शयति॥ यथेति॥
अनुमितिमभिनयति॥ तज्जन्यमिति॥ परामर्शजन्यमित्यर्थः॥ व्याप्तेर्लक्षणमाह॥ यत्रेति॥ यत्र धूम
इति व्याप्तेरभिनयः॥ साहचर्यनियम इति लक्षणं साहचर्यं सामानाधिकरण्यं व्याप्तिरित्यर्थः॥
पक्षधर्मतास्वरूपमाह॥ व्याप्यस्येति॥ स्वार्थानुमितिं दर्शयति॥ स्वयमेवेति॥ भूयोदर्शनेन कथं
व्याप्तिग्रह इति चेन्न व्यभिचारज्ञानविरहसहकृतसहचारज्ञानस्य व्याप्तिग्राहकत्वात् व्यभिचारज्ञा
नं निश्चयः शंका च तद्विरहः॥ क्वचित्तर्कात् क्वचित्स्वतःसिद्ध एव धूमाग्निव्याप्तिग्रहे कार्यकारण

भावभंगप्रसंगलक्षणस्तर्कः ॥ व्यभिचारशंकानिवर्तकः ॥ ननु सकलवह्निधूमयोरसंनिकर्षात्
कथं व्याप्तिग्रह इति चेन्न धूमत्ववह्नित्वरूपसामान्यप्रत्यासत्त्या सकलधूमवह्निज्ञानसंभवात् ॥
तस्मादिति लिंगपरामर्शादित्यर्थः ॥ परार्थानुमानमाह ॥ यत्त्विति ॥ पंचावयवप्रयोज्यं परार्थानुमानमिति
लक्षणेनान्वयः ॥ पंचावयवानुदाहरति ॥ यथेति ॥ अवयवस्वरूपमाह ॥ प्रतिज्ञेति ॥
दिविभागउदाहृतवाक्ये प्रतिज्ञात्वमाह ॥ पर्वतो वह्निमानिति साध्यवत्तया पक्षवचनं प्रतिज्ञा ॥ पंचम्यंतं लिंगप्र
तिपादकं हेतुः ॥ व्याप्तिप्रतिपादकमुदाहरणं ॥ पक्षधर्मताज्ञानार्थमुपनयः ॥ अबाधितत्वादिकं नि
गमनप्रयोजनं ॥ अनुमितिकरणमाह ॥ स्वार्थेति ॥ ननु व्याप्तिस्मृतिपक्षधर्मताज्ञानाभ्यामेवानु
मितिसंभवे विशिष्टपरामर्शः किमर्थमंगीकर्तव्य इति चेन्न वह्निव्याप्यवानिति शाब्दपरामर्शस्य न्य
त्वेपरामर्शस्यावश्यकत्वात् लाघवेन सर्वत्र परामर्शस्यैव करणत्वात् ॥ लिंगं न करणं अतीतादौ व्यभिचारात् ॥

सप्रकारकमिति॥ नामजात्यादिविशेषणविशेष्यसंबंधावगाहिज्ञानमित्यर्थः॥ सविकल्पकमुदाहरति॥ यथेति॥
इंद्रियार्थसंन्निकर्षं विभजते॥ प्रत्यक्षेति॥ संयोगसंन्निकर्षमुदाहरति॥ चक्षुषेति॥ द्रव्यप्रत्यक्षे सर्वत्र
संयोगः संन्निकर्ष इत्यर्थः॥ आत्मा मनसा संयुज्यते॥ मन इंद्रियेण इंद्रियमर्थेन ततः प्रत्यक्षज्ञानमु
त्पद्यते॥ संयुक्तसमवायमुदाहरति॥ घटरूपमिति॥ तत्र युक्तिमाह॥ चक्षुःसंयुक्तेति॥ संयुक्तसमवेत
समवायमुदाहरति॥ रूपत्वेति॥ समवायमुदाहरति॥ श्रोत्रेति॥ तदुपपादयति॥ कर्णेति॥ ननु दूरस्य
शब्दस्य कथं श्रोत्रसंबंध इति चेन्न॥ वीचीतरंगन्यायेन कदंबमुकुलन्यायेन वा शब्दांतरोत्पत्तिक्रमेण
श्रोत्रदेशे जातस्य श्रोत्रसंबंधात् प्रत्यक्षत्वसंभवात्॥ समवेतसमवायमुदाहरति॥ शब्दत्वेति॥
विशेषणविशेष्यभावमुदाहरति॥ अभावेति॥ तदुपपादयति॥ घटाभाववदिति॥ भूतले घटो नास्ती
त्यत्र अभावस्य विशेषणविशेष्यत्वं द्रष्टव्यं॥ एतेन वक्ष्यमाणेन अनुपलब्धेः प्रमाणांतरत्वं निरस्तं॥

स भूयं अभावो निरूप्यते ॥ इति भाष्यं ॥ समवायं अधिकरण प्रतियोगिभ्यां तत्स्वप्नेनैवाभावो निरूप्यते अभाव

यद्यत्र घटोऽभविष्यत् ॥ तदा भूतलमिवाद्रक्ष्यत् ॥ दर्शनाभावान्नास्तीति तर्कितप्रतियोगिसत्त्वविरोध्य
नुपलब्धिसहकृतेन्द्रियेणैव अभावस्योपपत्तौ अनुपलब्धेः ॥ प्रमाणान्तरस्यासंभवात् ॥ अधिकरण
ण ज्ञानार्थमपेक्षणीयेन्द्रियस्यैव करणत्वोपपत्तौ अनुपलब्धेः ॥ करणत्वस्यायुक्तत्वात् ॥ विशेषणविशेष्यभावोऽपि
विशेषणविशेष्यस्वरूपमेव ॥ नातिरिक्तः संबंधः ॥ प्रत्यक्षज्ञानमुपसंहरन् तस्य करणमाह ॥ त्रयमिति ॥ त
त्करणमिति ॥ असाधारणकारणत्वात् ॥ इन्द्रियं प्रत्यक्षज्ञानकरणमित्यर्थः ॥ प्रत्यक्षमुपसंहरति ॥ त
स्मादिति ॥ अनुमानं लक्षयति ॥ अनुमितिकरणमिति ॥ अनुमितेर्लक्षणमाह ॥ परामर्शेति ॥ ननु संशयो
त्तरप्रत्यक्षेऽतिव्याप्तिः ॥ स्थाणुपुरुषसंशयानन्तरं पुरुषत्वव्याप्यकरादिमानयमिति परामर्शे सति पुरुषोऽय
मेवेति ॥ प्रत्यक्षजननात् ॥ न च तत्रानुमितिरेव वाच्यं ॥ पुरुषं साक्षात्करोमीत्यनुव्यवसायविरोधा
दिति चेन्न पक्षतासहकृतपरामर्शजन्यत्वस्य विवक्षितत्वात् ॥ सिषाधयिषाविरहसहकृतसिद्ध्यभावः

व्यापारवत्कारणं करणमिति मते परामर्शद्वारा व्याप्तिज्ञानं करणं ॥ तज्जन्यत्वे सति तज्जन्यजनको व्या
पारः ॥ अनुमानमुपसंहरति ॥ तस्मादिति ॥ लिंगं विभजते लिंगमिति ॥ अन्वयव्यतिरेकिण लक्षयति ॥
अन्वयेनेति ॥ हेतुसाध्ययोर्व्याप्तिरन्वयव्याप्तिः तदभावयोर्व्याप्तिर्व्यतिरेकव्याप्तिः ॥ केवलान्वयि
नो लक्षणमाह ॥ अन्वयेति ॥ केवलान्वयि साध्यकं केवलान्वयि ॥ असंताभावाप्रतियोगित्वं केवलान्व
यित्वं ॥ ईश्वरप्रमाविषयत्वं सर्वपदार्थाभिधेयत्वं च सर्वत्रास्तीति व्यतिरेकाभावः ॥ व्यतिरेकिणो ल
क्षणमाह ॥ व्यतिरेकमात्रेति ॥ साध्याभावसाधनाभावयोर्व्याप्तिमत्केवलव्यतिरेकी ॥ व्यतिरेकिणं
॥ उदाहरति ॥ पृथिवीति ॥ ननु इतरभेदः प्रसिद्धो वा न वा ॥ आद्ये यत्र प्रसिद्धः ॥ तत्र हेतुसत्त्वे अन्वयि
त्वं ॥ असत्त्वे असाधारण्यं ॥ द्वितीये साध्यप्रसिद्ध्यभावान् ॥ कथं तद्विशिष्टानुमितिः ॥ विशेषणज्ञाना
भावे विशिष्टज्ञानानुदयात् ॥ प्रतियोगिज्ञानाभावाद्व्यतिरेकव्यतिरेकव्याप्तिज्ञानमपि न स्यात् ॥

इति चेन्न जलादित्रयोदशान्योन्याभाववत्त्वं त्रयोदशसु प्रत्येकं प्रसिद्धानां मेलनं पृथिव्यां साध्य
ते ॥ त्रयोदशत्वावच्छिन्नभेदरूपसाध्यस्यैकाधिकरणवृत्तित्वाभावात् ॥ नान्वयित्वासाधारण्ये ॥
प्रत्येकाधिकरणप्रसिद्ध्या साध्यविशिष्टानुमितिः ॥ व्यतिरेकव्याप्तिनिरूपणं चेति ॥ पक्षलक्षण
माह ॥ संदिग्धेति ॥ ननु श्रवणानंतरभाविमननस्थले अव्याप्तिः ॥ तत्र वेदवाक्यैरात्मनो नि
श्चितत्वेन संदेहाभावात् ॥ किंच प्रत्यक्षेपि वह्नौ यत्रेच्छयानुमितिस्तत्राव्याप्तिरिति चेन्न ॥
उक्तपक्षताश्रयत्वस्य पक्षलक्षणत्वात् ॥ सपक्षलक्षणमाह ॥ निश्चितेति ॥ विपक्षलक्षणमाह ॥
निश्चितेति ॥ एवं सद्धेतुं निरूप्य असद्धेतुं निरूपयितुं विभजते ॥ सव्यभिचारेति ॥ अनुमिति
प्रतिबंधकयथार्थज्ञानविषयत्वं हेत्वाभासत्वं ॥ सव्यभिचारं विभजते ॥ स त्रिविध इ
ति ॥ साधारणं लक्षयति ॥ तत्रेति ॥ उदाहरति ॥ यथेति ॥ असाधारणं लक्षयति ॥ सर्वेति ॥

अनुपसंहारिणो लक्षणमाह ॥ अन्वयेति ॥ विरुद्धं लक्षयति ॥ साध्येति ॥ सत्प्रतिपक्षं लक्ष
यति ॥ साध्येति ॥ असिद्धं विभजते ॥ असिद्ध इति ॥ आश्रयासिद्धमुदाहरति ॥ गगनेति ॥
स्वरूपासिद्धमुदाहरति ॥ शब्द इति ॥ व्याप्यत्वासिद्धस्य लक्षणमाह ॥ सोपाधिक इति ॥
उपाधिलक्षणमाह ॥ साध्येति ॥ उपाधिश्चतुर्विधः ॥ केवलसाध्यव्यापकः ॥ पक्षधर्मा
वच्छिन्नसाध्यव्यापकः ॥ साधनावच्छिन्नसाध्यव्यापकः ॥ उदासीनधर्मावच्छिन्नसाध्यव्या
पकश्चेति ॥ आद्य आर्द्रेधनसंयोगः द्वितीयो यथा वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वा
दित्यत्र बहिर्द्रव्यत्वावच्छिन्न प्रत्यक्षत्वव्यापकउद्भूतरूपवत्वं ॥ तृतीयो यथा ध्वंसो विना
शी ॥ जन्यत्वात् इत्यत्र जन्यत्वावच्छिन्नानित्यत्वव्यापकं भावत्वं ॥ चतुर्थस्तु ॥ प्रागभावो विनाशी
प्रमेयत्वादित्यत्र जन्यत्वावच्छिन्नानित्यत्वव्यापकं भावत्वमुपाधिः ॥ बाधितस्य लक्षणमाह ॥

॥२४॥ यस्येति॥ अत्रबाधस्यग्राह्याभावनिश्चयत्वेन सत्प्रतिपक्षस्यविरोधिज्ञानसामग्रीत्वेनसा
क्षादनुमितिप्रतिबंधकत्वं॥ इतरेषांतु परामर्शप्रतिबंधकत्वं॥ तत्रापि साधारणस्य व्यभिचा
राभाववत्तया विरुद्धस्यसामानाधिकरण्याभाववत्तया व्याप्यत्वासिद्धस्यविशिष्टव्याप्त्यभा
ववत्तया असाधारणानुपसंहारिणोः व्याप्तिसंशयाधायकत्वेनच व्याप्तिज्ञानप्रतिबंधकत्वं॥ आ
श्रयासिद्धस्वरूपासिद्धयोः पक्षधर्मताज्ञानप्रतिबंधकत्वं॥ उपाधिस्तु व्यभिचारज्ञान
द्वारा व्याप्तिज्ञानप्रतिबंधकः॥ सिद्धसाधनंतु पक्षताविघटकतया आश्रयासिद्धेःअंत
र्भवति॥ निग्रहस्थानांतरमितिनवीनाः उपमानंलक्षयति॥ उपमितीति॥ शब्दंलक्षयति॥ आ
प्तेति॥ पदलक्षणमाह॥ शक्तमिति॥ अर्थस्मृत्यनुकूलः पदपदार्थसंबंधः शक्तिः॥ साच
पदार्थांतरमिति॥ मीमांसकाः॥ तन्निरासार्थमाह॥ अस्मादिति॥ ईश्वरादीनामिव घटादीनामपि ॥२४॥

संकेतएवशक्तिः ॥ ननुपदार्थांतरमित्यर्थः ॥ गवादिशब्दानांजातावेवशक्तिः ॥ विशेषणतया
जातेःप्रथममुपस्थितत्वात् ॥ व्यक्तिलाभस्तुआक्षेपादिनाइतिकेचित्इतिचेन्न ॥ गामानये
त्यादौव्यवहारेसर्वत्रानयनादेर्व्यक्तावेवसंभवेनजातिविशिष्टव्यक्तावेवशक्तिकल्पनात् ॥
शक्तिग्रहश्चवृद्धव्यवहारेणव्युत्पित्सुर्बालोगामानयेत्युत्तमवृद्धवाक्यश्रवणानंतरंमध्यम
वृद्धस्यप्रवृत्तिमुपलभ्यगवानयनंचदृष्ट्वामध्यमवृद्धप्रवृत्तिजनकज्ञानस्यअन्वयव्यतिरेका
भ्यांवाक्यजन्यत्वंनिश्चिस अश्वमानयगांबधानेति ॥ वाक्यांतरेआवापोद्वापाभ्यांगोपद
स्यगोत्वविशिष्टेशक्तिः ॥ अश्वपदस्यअश्वत्वविशिष्टेशक्तिरितिव्युत्पद्यते ॥ ननुसर्वत्रकार्यपर
त्वात्व्यवहारस्यकार्यपरवाक्येएवव्युत्पत्तिर्नसिद्धपरइतिचेन्नकाश्यांत्रिभुवनतिलकोभू
पतिरित्यादौसिद्धेपिव्यवहारात् ॥ विकसितपद्मेमधुकरइत्यादौप्रसिद्धपदसमभिव्याहारा

त्वसिद्धेपि मधुकवादि स्मृतिरवनाच्च ।। लक्षणापि शब्दवृत्तिः ।। शक्यसंबंधो लक्षणा गंगा
वा यां घोष इत्यत्र गंगापदवाच्यप्रवाहसंबंधादेव तीरोपस्थितौ तीरे शक्तिकल्पनायोगात् लक्षणा ।।
सैंधवादौ लवणाश्वयोः परस्परसंबंधाभावान्नानाशक्तिकल्पनं ।। लक्षणा त्रिविधा ।। जह
ल्लक्षणा ।। अजहल्लक्षणा ।। जहदजहल्लक्षणा चेति ।। यत्र वाच्यार्थस्य अन्वयाभावः ।। तत्र जहती ।।
यथा मंचाः क्रोशंतीति ।। यत्र वाच्यस्यापि अन्वयः ।। तत्र अजहती ।। यथा छत्रिणो यांति ।। यत्र वाच्यै
कदेशत्यागेन एकदेशान्वयः ।। तत्र जहदजहती ।। यथा तत्त्वमसीति ।। गौण्यपि लक्षणैव लक्ष्यमाणगुण
संबंधरूपा ।। अग्निर्माणवक इति ।। व्यंजनापि शक्तिलक्षणांतर्भूता ।। अर्थवाक्तिमूलाच ।। अनुमाना
दिना अन्यथासिद्धा ।। तात्पर्यार्थानुरोधात् प्रकरणादिकं तात्पर्यग्राहकं ।। द्वारमित्यादौ पिधेहीति
शब्दाध्याहारः ।। ननु अर्थज्ञानार्थत्वात् शब्दस्य ।। अर्थं विदित्वा शब्दाध्याहारासंभवात् ।। अर्था
ध्याहार एव युक्त इति चेन्न पदविशेषजन्यपदार्थोपस्थितेः शाब्दज्ञाने हेतुत्वात् अन्यथा घटः कर्म

न तं औयनं क्लिरिसत्रापिशक्त्स्तानप्रसंगात्॥ पंकजादिपदेषु योगरूढिः॥ अवयवशक्तिर्योगः॥ समु
दायशक्ती रूढिः॥ नियतपद्मत्वाद्युपस्थानार्थं समुदायशक्तिः॥ अन्यथा कुमुदेपि प्रयोगप्रसंगः॥ इत
रान्वितेशक्तिरिति प्राभाकराः॥ अन्वयस्य वाक्यार्थतया भानसंभवात्॥ अन्वयांशेपि शक्तिर्न
कल्पनीयेति॥ गौतमीयाः॥ आकांक्षेति॥ आकांक्षादिसाहित्यमित्यर्थः॥ अन्यथा कांक्षादिभ्रमात्॥
शाब्दभ्रमो न स्यात्॥ आकांक्षां लक्षयति॥ पदस्येति॥ योग्यतालक्षणमाह॥ अर्थेति॥ सन्निधि
लक्षणमाह॥ पदानामिति॥ अविलंबेन पदार्थोपस्थितिः संनिधिः॥ उच्चारणं तु तदुपयोगितयो
क्तं॥ गौरश्व इति घटः कर्मत्वं इत्यादि नाकांक्षोदाहरणं द्रष्टव्यं॥ वैदिकस्य विशेषमाह॥ वैदिक
मीश्वरोक्तत्वादिति॥ ननु वेदस्यानादित्वात्कथमीश्वरोक्तत्वमिति चेन्न॥ वेदः पौरुषेयः वाक्यस
मूहत्वात्॥ भारतादिवत्॥ न च स्मर्यमाणकर्तृत्वमुपाधिः॥ गौतमादिभिः शिष्यपरंपरया वेदेपि

॥२६॥ कर्त्रस्मरणेन साधनव्यापकत्वात् ॥ तस्मात्तेपानात् ॥ त्रयो वेदा अजायंत इति श्रुतेश्च ॥ ननु
वर्णा नित्यास्तु एवायं गकार इति प्रत्यभिज्ञाबलात् । तथा च कथं वेदस्य अनित्यत्वमिति चेन्न
उत्पन्नो गकारो नष्टो गकार इति प्रतीत्या वर्णानामनित्यत्वात् ॥ सोयं गकार इति प्रत्यभिज्ञायाः सेयं दी
पज्वालेतिवत् ॥ जातावलंबनत्वात् ॥ वर्णानां नित्यत्वेपि आनुपूर्व्या अनित्यत्वाच्च तस्मादी [illegible]
श्वरोक्तो वेदः मन्वादिस्मृतीनां आचमनादीनां च वेदमूलकतया प्रामाण्यं स्मृतिमूलवाक्यानां इदानीं
अनध्ययनात् ॥ तन्मूलभूता काचिच्छाखा विच्छिन्नेति कल्प्यते ननु पठ्यमानवेदवाक्योत्सादस्य क
ल्पयितुमशक्यत्वात् विप्रकीर्णवादस्यायुक्तत्वात् ॥ नित्यानुमेयो वेदो मूलमिति चेन्न तथा सति
वर्णानुपूर्व्या ज्ञानाभावेन बोधकत्वासंभवात् ॥ नन्वेतानि पदानि स्मारितार्थसंसर्गवंति आकां
क्षादिमत्पदकदंबकत्वात् ॥ मद्वाक्यवत् ॥ इत्यनुमानादेव संसर्गज्ञानसंभवात् ॥ शब्दो न प्र ॥२५॥

माणांतरमिति चेन्न अनुमितिस पक्षधर्मताज्ञानस्य विलक्षणस्य शब्दान्तरसेमी सत्त्वनुभव वसाय
साक्षिकस्य सर्वसंमतत्वात्॥ नन्वर्थापत्तिरपि प्रमाणांतरमस्ति पीनो देवदत्तो दिवा न भुंक्ते इति
दृष्टे श्रुते वा पीनत्वान्यथानुपपत्त्या रात्रिभोजनं अर्थापत्त्या कल्प्यत इति चेन्न देवदत्तो [illegible] रात्रौ द
भुंक्ते दिवा अभुंजाने सति पीनत्वात्॥ इत्यनुमानेनैव रात्रिभोजनस्य सिद्धत्वात् शतं पंचा
शदिति संभवोप्यनुमानमेव इह घटे घटत्वमस्ति इति ऐतिह्यमपि अस्य लक्षणम् एकः शब्द एव न
चेष्टापि शब्दानुमानद्वारा व्यवहारहेतुरिति प्रमांतरं तस्मात् प्रत्यक्षानुमानोपमानशब्दाः
चत्वार्येव प्रमाणानि ज्ञानानां तदुत्पत्ति तत्प्रकारकत्वं स्वतो ग्राह्यं परतो वेति विचार्यते तत्र वि
प्रतिपत्तिः ज्ञानप्रामाण्यं तदप्रामाण्यग्राहकं यावत् ज्ञानग्राहकसामग्री ग्राहकं न वा अत्र
विधिकोटिः स्वतस्त्वं निषेधकोटिः॥ परतस्त्वं अनुमानाद्याहलेन सिद्धसाधनवारणाय च

दिति ॥ इदं ज्ञानं अप्रमेति निश्चयेन प्रामाण्याग्रहवत् ॥ बाधवारणाय प्रामाण्यग्राहकेति ॥ इदं ज्ञानं अप्रमेत्येवानुव्यव
सायनिष्ठ प्रामाण्यग्राहकस्य अप्रामाण्यग्राहकत्वाभावात्स्वव्यवस्थं न स्यात् ॥ अत उक्तमिति ॥ तस्मिन् प्रामाण्या
भावे अप्रामाण्याग्राहके सत्यर्थः ॥ उद्धृतस्य तु व्यवसाये अप्रामाण्यग्राहकस्यापि अनुव्यवसायेतदग्राहक
त्वात् ॥ स्वतस्त्वसिद्धिः ॥ ननु स्वतस्त्वप्रामाण्यं गृह्यते ॥ घटमहं जानामीत्यनुव्यवसायेन घटघटत्वयो
रिव तत्संबंधस्यापि विषयीकरणात् ॥ व्यवसायस्वरूपप्रकारसत्त्वे सुलभत्वात् ॥ पुरोवर्तिनि प्रकारसंबंधस्ये
व प्रमात्वपदार्थत्वादिति चेन्न ॥ स्वतःप्रामाण्यपक्षे जलज्ञानं प्रमा न वेत्यनभ्यासदशायां प्रमात्वसंशये
न स्यात् ॥ अनुव्यवसायेन प्रामाण्यस्य निश्चितत्वात् ॥ तस्मात्स्वतो ग्राह्यत्वाभावात् ॥ परतो ग्राह्यत्वं ॥
तथाहि ॥ प्रथमं जलज्ञानानंतरं प्रवृत्तौ सत्यां जललाभे सति पूर्वोत्पन्नं जलज्ञानं प्रमा सफलप्रवृत्तिजनक
त्वात् यन्नैवं तन्नैवं ॥ यथा अप्रमेति व्यतिरेकिणा प्रमात्वं निश्चीयते ॥ द्वितीयादि प्रमायाः ज्ञानेषु पूर्वज्ञानदृष्टं

तेन तत्सजातीयतल्लिंगेन अन्वयव्यतिरेकिणा निगमयति॥ प्रमायाः गुणजन्यत्वं उत्पत्तौ परतस्त्वं प्रमासाधारण
कारणं गुणः॥ अप्रमासाधारणं दोषः॥ तत्र प्रत्यक्षे विशेषणवद्विशेष्यसन्निकर्षो गुणः॥ अनुमितौ व्याप
कवति व्याप्यज्ञानं॥ उपमितौ यथार्थसादृश्यज्ञानं॥ शाब्दज्ञाने यथार्थयोग्यताज्ञानमित्यूहनीयं॥
पुरोवर्तिनि प्रकाराभावस्य व्यवसायेन अनुपस्थितत्वात्॥ अप्रमायाः परत एव ग्राह्यत्वे॥ पित्तादिदोषज प्र
न्यत्वादुत्पत्तौ परतस्त्वं ननु सर्वज्ञानानां यथार्थत्वात्॥ अयथार्थज्ञानमेव नास्ति॥ न च शुक्ताविदं रज र
तमिति ज्ञानात्प्रवृत्तिदर्शनादन्यथाख्यातिसिद्धिरिति वाच्यं॥ रजतस्मृतिपुरोवर्तिज्ञानाभ्यामेव प्र
वृत्तिसंभवात्॥ उपस्थितेष्टभेदाग्रहस्यैव सर्वत्र प्रवर्तकत्वेन नेदं रजतमित्यादावतिप्रसंगाभावा
दिति चेन्न सत्यरजतस्थले पुरोवर्तिविशेष्यकरजतत्वप्रकारकज्ञानस्य लाघवेन प्रवृत्तिजनकत्वात् शु
क्तावपि रजतार्थिप्रवृत्तिजनकत्वेन विशिष्टज्ञानस्यैव कल्पनात्॥ अयथार्थानुभवं विभजते॥ अयथार्थेति॥

॥३८॥ स्वप्नस्य मानसविपर्ययस्वरूपत्वात्॥ न भैविध्यविरोधः॥ संशयलक्षणमाह॥ एकेति॥ घटपटावित्ति
समूहालंबनेति व्याप्तिवारणाय एकेति॥ घटो द्रव्यमिति साराचवतिव्याप्तिवारणाय विरुद्धेति॥ पटत्ववि
रुद्ध घटत्ववानिसत्रातिव्याप्तिवारणाय नानेति॥ विपर्ययलक्षणमाह॥ मिथ्येति॥ तदभाववति तत्प्र
कारकनिश्चयपरत्वर्थः॥ तर्कं लक्षयति॥ व्याप्येति॥ यद्यपि तर्कोपि विपर्ययं तर्भवति॥ तथापि प्रमा
णानुग्राहकत्वात् भेदेन कीर्तनं॥ स्मृतिं विभजते॥ स्मृतिरिति॥ सुखं लक्षयति॥ सर्वेषामिति॥
सुखस्य हमिसाचनुव्यवसायगम्य सुखत्वादिकमेव लक्षणं॥ यथा श्रुतंस्यस्स कथनमिति द्रष्टव्यं॥
सं संस्कारं विभजते संस्कार इति॥ संस्कारत्वजातिमान् संस्कारः॥ वेगस्य आश्रयमाह॥ वेग इति वेग
त्वजातिमान् वेगः॥ भावनां लक्षयति॥ अनुभवेति॥ आत्मासाधावति व्याप्तिवारणाय अनुभवेति॥ ॥३८॥

अनुभवध्वंसेऽतिव्याप्तिवारणाय स्मृतीति ॥ स्मृतेरपि संस्कारजन्यत्वं नवीनैरुक्तं ॥ स्थितिस्थापकं
लक्षयति ॥ अन्यथेति ॥ संख्यादयो द्वौ नैमित्तिकद्रवत्ववेगस्थितिस्थापकाः सामान्यगुणाः अन्ये
रूपादयो विशेषगुणाः ॥ द्रव्यविभाजकोपाधिद्वयसमानाधिकरणावृत्तिजातिमत्वं विशेषगुण
त्वं कर्मणो लक्षणमाह ॥ चलनेति ॥ उत्क्षेपणादीनां कार्यभेदमाह ॥ उर्ध्वेति ॥ शरीरेति ॥ क्रतासं व
पादकं आकुंचनं ॥ ऋजुतासंपादकं प्रसारणमित्यर्थः ॥ सामान्यं लक्षयति ॥ नित्यमिति ॥ परमाणु
परिमाणादावतिव्याप्तिवारणाय अनेकेति ॥ अनुगतत्वं समवेतत्वं तेन नाभावादावतिव्याप्तिः ॥ विशेषं
लक्षयति ॥ नित्येति ॥ समवायं लक्षयति नित्यसंबंधेति ॥ संयोगेऽतिव्याप्तिवारणाय नित्येति ॥ आ
काशादावतिव्याप्तिवारणाय संबंध इति ॥ अयुतसिद्धिं लक्षणमाह ॥ ययोरिति ॥ नीलो घट इति
विशिष्टप्रतीतिः विशेषणविशेष्यसंबंधविषया विशिष्टप्रत्ययत्वात् ॥ दंडीति प्रत्ययवत् ॥ इति स

मवायसिद्धिः अवयवावयविनौ इति॥ द्रव्यसमवायीकारणमवयव:॥ जन्यद्रव्यमवयवी॥ प्रागभा
वं लक्षयति॥ अनादिरिति॥ आकाशादावतिव्याप्तिवारणाय सांत इति घटादावतिव्याप्तिवारणाय
अनादिरिति॥ प्रतियोगिसमवायिकारणवृत्तिः प्रतियोगिजनकः भविष्यतीति व्यवहारहेतुः॥
प्रागभावः॥ ध्वंसं लक्षयति॥ सादिरिति॥ घटादावतिव्याप्तिवारणाय अनंत इति आकाशा
दावतिव्याप्तिवारणाय सादिरिति॥ प्रतियोगिजन्यः प्रतियोगिसमवायिवृत्तिः ध्वस्तव्यवहार
हेतुः ध्वंसः॥ असंताभावं लक्षयति॥ त्रैकालिक इति॥ अन्योन्याभावे अतिव्याप्तिवारणाय सं
सर्गावच्छिन्नेति॥ ध्वंसप्रागभावयोरतिव्याप्तिवारणाय त्रैकालिक इति॥ अन्योन्याभावं लक्ष
यति॥ तादात्म्येति॥ प्रतियोगितावच्छेदकारोप्य संसर्गभेदादेकप्रतियोगिकयोरसंताभावान्योन्या
भावयोः बहुत्वे केवलदेयदत्ताभावादुभयाभाव इति प्रतीत्या विशिष्टाभावः एकसत्वे द्वौ नस्त

इतिप्रतीत्या द्वित्वावच्छिन्नाभावः संयोगसंबंधेन घटवति समवायसंबंधेन घटाभावः॥ ननुद्व
याभावात् घटत्वावच्छिन्नप्रतियोगिकसामान्याभावस्य अतिरिक्तः॥ एवमन्योन्याभावेपि घट
त्वावच्छिन्नप्रतियोगितास्तीति व्यधिकरणधर्मावच्छिन्नाभावो नांगीक्रियते॥ पटे घटत्वंनास्ती
तिरस्यार्थः॥ अतिरिक्तत्वे सकेवलान्वयी॥ सामयिकाभावो संताभावएवसमये विशेषे
प्रतीयमानः॥ घटाभाववति घटानयने असंताभावस्याप्रतीतिः॥ घटापसरणेसति
प्रतीतेः भूतलघटसंयोगप्रागभावप्रध्वंसयोरसंताभावे प्रतीतिनियामकत्वं कल्प्यते॥ घट
वतितलसंयोगप्रागभावध्वंसयोरसत्वात्॥ असंताभावस्याप्रतीतिः घटापसरणेच संयोग
ध्वंसस्सत्वात्॥ प्रतीतिरितिकेवलाधिकरणादेवनास्तीतिव्यवहारोपपत्तौ अभावोनपदा

॥२०॥ ध्वंसमिति ॥ गुरवस्तन्न ॥ अभावाभावांगीकारे कैवल्यस्यानिर्वक्तुमशक्यत्वात् ॥ अभावाभावो
भाव एवनातिरिक्तः ॥ अनवस्थाप्रसंगात् ॥ ध्वंसः प्रागभावः प्रागभावो ध्वंसस्य
प्रतियोग्येव ॥ अभावाभावो अतिरिक्त एव ॥ तृतीयाभावस्य प्रथमपर्यवसानात् ॥ नानवस्थेति
नवीनाः प्रमाणप्रमेयसंशयप्रयोजनदृष्टांतसिद्धांतावयवतर्कनिर्णयवादजल्पवितं
डाहेत्वाभासछलजातिनिग्रहस्थानानां तत्वज्ञानान्निःश्रेयसाधिगम इति न्यायशास्त्रे
षोडशपदार्थानामुक्तत्वात्कथं सप्तैवेत्यत आह ॥ सर्वेषामिति ॥ सर्वेषां सप्तस्वेवांतर्भावः ॥
आत्मशरीरेंद्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयमिति द्वादश
विधं प्रमेयं प्रवृत्तिर्धर्माधर्मौ रागद्वेषमोहा दोषाः ॥ रागः इच्छा द्वेषो मन्युः मोहः शरीरादावात्मभ्रमः ॥ ॥२०॥

प्रेत्यभावो मरणं ॥ फलं भोगः ॥ अपवर्गो मोक्षः ॥ स च स्वसमानाधिकरण दुःख प्रागभावासमा
नकालीन दुःखध्वंसः ॥ प्रयोजनं सुखं दुःखहानिश्च ॥ दृष्टांतो महानसादिः ॥ प्रामाणिकत्वेना
भ्युपगतोर्थः सिद्धांतः ॥ निर्णयो निश्चयः ॥ प्रमाणफलं ॥ तत्वबुभुत्सोः कथा वादः ॥ उभयसाधन
वती विजिगीषुकथा जल्पः ॥ स्वपक्षस्थापनहीना वितंडा ॥ कथा नाम नानावक्तृकः पूर्वोत्तर
पक्षवाक्यसंदर्भः ॥ अभिप्रायांतरेण प्रयुक्तस्य अर्थांतरप्रकल्पय दूषणं छलं ॥ असदु
त्तरं जातिः साधर्म्य वैधर्म्य उत्कर्षापकर्ष वर्ण्यावर्ण्य विकल्प साध्यासाध्य प्राप्त्यप्राप्ति प्रसंग
प्रतिदृष्टांत अनुत्पत्ति संशय प्रकरण हेत्वर्थापत्ति अविशेषोपलब्धि अनुपलब्धि कारण नित्य अनित्य
कार्यसमा जातयः ॥ वादिनो अपजयहेतुः ॥ निग्रहस्थानं प्रतिज्ञाहानिः ॥ प्रतिज्ञांतरं प्रतिज्ञा
विरोधः ॥ प्रतिज्ञासंन्यासो हेत्वंतरं अर्थांतरं निरर्थकं अविज्ञातार्थं अपार्थकं अप्राप्तकालं

न्यूनंअधिकंपुनरुक्तंअननुभाषणंअज्ञानंअप्रतिक्षेपो मतानुज्ञापर्यनुयोज्यापेक्षणंनिरनुयोज्यानुयोगः॥
अपसिद्धांतः हेत्वाभासश्च निग्रहस्थानविशेषंसुगमं॥ ननु करतलानलसंयोगे सत्यपि प्रतिबंधके
सति दाहाननुकूलेः॥ शक्तिः पदार्थांतरमिति चेन्न प्रतिबंधकाभावस्य कार्यमात्रे कारणत्वेन शक्तेरनुपयो
गात्॥ कारणस्यैव शक्तिपदार्थत्वात्॥ ननु भस्मादिनाकोस्माद्देशेभुपि दर्शनात् आधेयशक्तिरंगीकार्ये
ति चेन्न भस्मादिसंयोगस्य समानकालीनअस्पर्शस्पर्शप्रतियोगिकयावदभावसहितभस्मादि
संयोगध्वंसस्यैव शक्तिपदार्थत्वात्॥ सत्त्वमपि न पदार्थांतरं॥ यथेष्टविनियोगयोग्यत्वस्य सत्व
८ रूपत्वात्॥ तेनैवं छेदकं च प्रतिग्रहादिलब्धमेवेति॥ अथ विधिर्निरूप्यते॥ प्रबलजनकचिकी
र्षाजनकज्ञानविषयो विधिः॥ तत्प्रतिपादको लिङादिः॥ फलसाध्ये प्रवृत्तेसद्दर्शनात्॥ कृति
साध्यताज्ञानं प्रवर्तकं॥ नच विषभक्षणादौ प्रवृत्तिप्रसंगः इष्टसाधनता लिंगकरुतिसाध्य
ताज्ञानस्य काम्यस्थले विहितकालजीवित निमित्तज्ञानस्य नैमित्तिकस्थले प्रवर्तकत्वात्॥

व नचाननुगमः॥ जन्यत्वविशेषणं तत्प्रतिसंधानजनकस्य अनुगतत्वादिति गुरवः॥ तन्न॥ लाघवेन
कृतिसाध्येष्टसाधनत्वज्ञानस्यैव चिकीर्षाद्वारा प्रयत्नजनकत्वात्॥ नच मिते इष्टसाधनता
भावादप्रवृत्तिप्रसंगः॥ तत्रापि प्रत्यवायपरिहारस्य पापक्षयस्य च फलस्य कल्पनात्॥
तस्मात्कृतिसाध्येष्टसाधनत्वमेव लिङर्थः॥ ननु ज्योतिष्टोमेन स्वर्गकामो यजेत इत्यत्र
लिङः स्वर्गसाधनं कार्यं प्रतीयते॥ यागस्य अपूर्वं व्यापारं विना विनाशिनः कालांतरभाविस्वर्ग
साधनत्वायोगात्॥ येयं स्थायि कार्यं अपूर्वमेव लिङर्थः॥ कार्यं कृतिसाध्यं कृतेः सवि
षयत्वात्॥ विषयाकांक्षायां योगविषयत्वेनान्वेति॥ कस्य कार्यमिति नियोज्याकांक्षायां स्व
र्गकामपदं नियोज्यपरतयान्वेति॥ कार्यं चोद्यो नियोज्यः॥ तेन ज्योतिष्टोमनामयागविषय
स्वर्गकामस्य कार्यमिति वाक्यार्थः॥ संपद्यते वैदिकलिङः सात्॥ यावज्जीवमग्निहोत्रं जुहुया

॥२३॥ दिति विसवाक्ये पि अपूर्वमेव वाक्यं कल्प्यते॥ आरोग्यकामो भेषजपानं कुर्यादित्यादौ
किंकर्तव्यता क्रियाकार्यत्वक्षणे ति चेन्न यागस्यापि अयोग्यतानिश्चयाभावेन साधन
तयाप्रतीत्यनंतरं तन्निर्वाहार्थं अवांतरव्यापारतया अपूर्वकल्पनात् कीर्तनादिनाना
शाद्युते॥ तयागध्वंसो व्यापारः॥ लोकव्युत्पत्तिबलात्॥ क्रियायामेव कृतिसाध्यत्व
साधनत्वं लिंगबोध्यत इति लिङ्त्वेन रूपेण विध्यर्थत्वं॥ आख्यातत्वेन प्रयत्नार्थ
कत्वं॥ पचति पाकं करोतीति विवरणदर्शनात्॥ किं करोतीति प्रश्ने पचतीत्यु
त्तराख्यानस्य प्रयत्नार्थत्वनिश्चयात्॥ रथो गच्छतीत्यादौ अनुकूलव्यापारे लक्षणा॥ २
देवदत्तः पचति देवदत्तेन पच्यते तंडुलः॥ इत्यादौ कर्तृकर्मणोर्नाख्यातार्थत्वं किंतु
॥२३॥

तस्मैकसादिनामेव ।। तयोराधेयपादेवत्ठाभः ।। प्रजयतीत्यादौ धात्वोरेव प्रकर्षे श
क्तिः ।। उपसर्गाणां द्योतकत्वमेव ।। न तत्र शक्तिरस्ति ।। पदार्थज्ञानस्य परमं प्रयो
४ जनं मोक्षः ।। तथा हि ।। आत्मा वारे द्रष्टव्यः श्रोतव्यो मंतव्यो निदिध्यासितव्य इति
श्रुत्या श्रवणादीनां साक्षात्कारहेतुत्वबोधनात् ।। श्रुत्यादेहादिविलक्षणात्मलाभे
ससंप्रसंभावनानिवृत्तेः ।। युक्त्यनुसंधानरूपमननसाध्यत्वात् ।। मननोपयोगी
पदार्थनिरूपणद्वारा शास्त्रस्यापि मोक्षोपयोगः ।। तदनंतरं श्रुत्युपदिष्टयोगविधि द
ना निदिध्यासने कृते तदनंतरं देहादिविलक्षणात्मसाक्षात्कारे सति देहाद्यहमभि

मानस्य मिथ्याज्ञाननाशे सति दोषाभावात्॥ प्रवृत्त्यभावे धर्माधर्मयोरभावाज्ज
न्माभावे पूर्वधर्माधर्मयोरनुभवेन नाशे चरमदुःखध्वंसलक्षणो मोक्षो जायते॥
ज्ञानमेव मोक्षसाधनं॥ मिथ्याज्ञाननिवृत्तेः॥ ज्ञानमात्रसाध्यत्वात्॥ तमेव
विदित्वातिमृत्युमेति नान्यः पंथा विद्यतेऽयनायेति साधनांतरनिषेधाच्च॥ ननु
तस्वर्गाप्तिहेतुवज्ज्ञानं कर्म चोभयमथामुनेरिति कर्मणोऽपि मोक्षसाधनत्वस्मरणा
त्॥ ज्ञानकर्मणोः समुच्चय इति चेन्न॥ निःसंगैर्मितिकैरेव कुर्वाणो दुरितक्षयं॥
ज्ञानं चाधिमत्तिर्कुर्वन्॥ अभ्यासेन च पाच्यते॥ अभ्यासात्पक्वविज्ञानं कै

वर्त्मं लभतेनर इत्यादिना कर्मणो ज्ञानसाधनत्वप्रतिपादनात् ॥ ज्ञानद्वारैव
कर्म मोक्षसाधनं न साक्षात् तस्मात् पदार्थज्ञानान्मोक्षः परमप्रयोजनम्
इति सर्वं रमणीयं इति श्रीमदनंतभट्टोपाध्यायकृततर्कसंग्रहटी
का समाप्ता ॥ श्री ॥ रामार्पणमस्तु ॥

सानुपदी धौः पदा देवरसबद्दं
नानामि॥

सानपदाधो॰ रुद्रै मैन
रुद्रेण

[OrderDescription]
,CREATED=26.12.19 15:39
,TRANSFERRED=2019/12/26 at 15:49:13
,PAGES=49
,TYPE=STD
,NAME=S0002395
,Book Name=M-2433-TARKSANGRAH DEEPIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF

FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF

FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF

FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,